# ॥ श्रीपादश्रीवल्लभ प्रार्थनास्तोत्रम् ॥

## अर्थात्

## ॥ अघोरकष्टोद्धरणस्तोत्रम् ॥

श्रीपाद श्रीवल्लभ त्वं सदैव । श्रीदत्तास्मान्पाहि देवाधिदेव ॥
भावग्राह्य क्लेशहारिन्सुकीर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ १ ॥

त्वं नो माता त्वं पिताऽऽप्तोऽधिपस्त्वम् । त्राता योगक्षेमकृत्सद्गुरुस्त्वम् ॥
त्वं सर्वस्वं नोऽ प्रभो विश्वमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ २ ॥

पापं तापं व्याधिमाधिं च दैन्यं । भीतिं क्लेशं त्वं हराऽ शुत्वदन्यम् ॥
त्रातारं नो वीक्ष ईशास्तजूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ३ ॥

नान्यस्त्राता नापि दाता न भर्ता । त्वत्तो देव त्वं शरण्योऽकहर्ता ॥
कुर्वत्रियानुग्रहं पूर्णराते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ४ ॥

धर्मे प्रीतिं सन्मतिं देवभक्तिम् । सत्संगाप्तिं देहि भुक्तिंच मुक्तिं ॥
भावासक्तिं चाखिलानन्दमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ५ ॥

श्लोकपंचकमेतद्यो लोकमंगलवर्धनम् ॥
प्रपठेन्नियतो भक्त्या स श्रीदत्तप्रियो भवेत् ॥ ६ ॥

॥ इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीवासुदेवानंदसरस्वती
विरचितं अघोरकष्टोद्धरणस्तोत्रं संपूर्णम् ॥